Reg. No. : ................................

Name : ..................................

**III Semester B.A. Degree CBCSS (OBE) Reg./Sup./Imp.**
**Examination, November 2021**
**(2019 – 2020 Admission)**
**CORE COURSE IN SANSKRIT**
**3B03 SKT : Nataka**

Time : 3 Hours                                                                 Max. Marks : 40

*सूचना : सर्वे प्रश्नाः संस्कृत भाषयैव समाधेयाः। देवनागरीलिपिरूपयोक्तव्या।*

I. एकेन द्वाभ्यां वा वाक्याभ्यां उत्तरं लिखत। (6×1=6)

1) 'अयि विवेकविश्रान्तमभिहितम्'–किमभिहितम् ?

2) 'अयं मे न पादरजसापि तुल्यः'– कस्य विषये को वदति ?

3) 'अलं सेवया, मध्यस्थतां गृहीत्वा भण'–का कां प्रति वदति ?

4) 'दिष्ट्या न गर्वितासि' – कस्या वचनमिदम् ? कां प्रति?

5) कालिदासस्य नाटकानि कानि ?

6) 'क्षिप्रमाहूयतां ध्रुवसिद्धिः' – कस्य वचनमिदम् ? कां प्रति ?

II. a) ससन्दर्भं त्रीणि व्याख्यात। (3×2=6)

7) अतिमात्रभासुरत्वं पुष्यति भानोः परिग्रहादनलः।
अधिगच्छति महिमानं चन्द्रोऽपि निशापरिगृहीतः।।

8) चित्रगतायामस्यां कान्तिविसंवादशङ्कि मे हृदयम्।
सम्प्रति शिथिलसमाधिं मन्ये येनेयमालिखिता।।

9) भावज्ञानानन्तरं प्रस्तुतेन प्रत्याख्याने दत्तयुक्तोत्तरेण।
वाक्येनेयं स्थापिता स्वे निदेशे स्थाने प्राणाः कामिनां दूत्यधीनाः।।

10) अप्याकरसमुत्पन्ना मणिजातिरसंस्कृता।
जातरूपेण कल्याणि! न हि संयोगमर्हति।।

P.T.O.



b) त्रयाणां लघूपन्यासं लिखत । (3×2=6)

11) इरावत्यो राजानं प्रति कोपस्य कारणम्।

12) विदर्भराजस्य सन्देशः।

13) मालविका राजकन्यकेति कथमवगम्यते ?

14) बकुलावलिका।

III. सप्रकरणं चतुर्णां आशयं विशदयत। (4×3=12)

15) उपस्थितं नयनमधु सन्निहितमक्षिकञ्च।

16) पङ्कच्छिदः फलस्येव निष्कर्षेणाविलं पयः।

17) न हि कमलिनीं दृष्ट्वा ग्राहमवेक्षते मतङ्गजः।

18) इयमपि हताशा त्वामेवानुकरोति।

19) सन्दर्शितेव ललिताभिनयस्य शिक्षा।

20) दुःखायते मम मनः सुखमश्नुते च।

IV. द्वे उपन्यस्यत। (2×5=10)

21) चतुर्थाङ्ककथां स्ववाक्यैः लिखत।

अथवा

कालिदासस्य नाटकानां संक्षिप्तं विवरणं लिखत।

22) अग्निमित्रस्य चरित्रचित्रणं कुरुत।

अथवा

मालविकाग्निमित्र नाटकस्य नाटकीयं वैशिष्ट्यं प्रतिपादयत।

_______________